International Journal of Sanskrit Research 2019; 5(4): 74-76

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(4): 74-76
© 2019 IJSR
www.anantaajournal.com
Received: 13-05-2019
Accepted: 15-06-2019

**Dr. Hariprasad K**
Asst. Professor, Department of Education, Rastriya Sanskrit Sansthan (D.U.) Rajiv Gandhi Campus, Sringeri, Karnataka, India

**Correspondence**
**Dr. Hariprasad K**
Asst. Professor, Department of Education, Rastriya Sanskrit Sansthan (D.U.) Rajiv Gandhi Campus, Sringeri, Karnataka, India

# संस्कृतभाषाशिक्षणाय सूचनासम्प्रेषणप्रविधिः

## Dr. Hariprasad K

**सारांश**
प्राचीनकाले गुरुकुलप्रणाल्यां तु स एव शिक्षां विन्दते स्म यस्य विविदिषा वर्तते । किन्तु सम्प्रति तथा नास्ति परिस्थितिः । इच्छुकः अनिच्छुकः श्रद्धावान् अश्रद्धावान् इत्यादिभेदैः विनैव शिक्षायाः प्राप्तेः अधिकारः सर्वेषाम् सम्प्रति लोकतन्त्रात्मके देशेऽस्माकं वर्तते । अतः कक्ष्यायां अत्यधिकसंख्याकानां सर्वविधच्छात्राणाम् अवगमनं यथा स्यात् तथा बोधयितुम् उपायाः चिन्तनीयाः, चिन्तिताश्च अनुष्ठेयाः । संस्कृतभाषाशिक्षणाय अपि तादृशाः उपायाः अपेक्ष्यन्ते। सूचनासम्प्रेषणप्रविधिः अस्यां दिशि एकः उत्तमः उपायः भवितुमर्हति इति अस्मिन् लेखे निरूपयितुं यत्नो व्यधायि।

**कुटशब्दः** सूचनासम्प्रेषणप्रविधिः, भाषाशिक्षणम्, सङ्क्रान्तिः

**प्रस्तावना**
संस्कृतशिक्षाक्षेत्रे आङ्ग्लशासनारम्भपर्यन्तमपि गुरुकुलीयशिक्षाप्रणाली अनूचानं प्रवर्तते स्म । गुरुकुलप्रणाल्यां तु स एव शिक्षां विन्दते स्म यस्य विविदिषा वर्तते । यद्यपि गुरुकुले आचार्यः माणवकस्य जिज्ञासापूर्त्यर्थम् प्रश्नोत्तरादीन् नैकान् विधीन् आश्रयते स्म तथापि माणवकः "श्रद्धवान् लभते ज्ञानम्" इति नयेन प्रवर्तते स्म इत्यतः आचार्यस्य बोधनदृष्ट्या तावत् कष्टं नासीत् यावदिदानीन्तनाः उपाध्यायाः अनुभवन्ति । इत्युक्ते पुराकाले आचार्यः विषयगतं काठिन्यं केवलं अपाकुरुते चेत् पर्याप्तं भवति स्म, अन्तेवसिनः रुचेः जागरणं कुर्वन् तस्य मानसिकतायाः अनुसारं विधीन् परिवर्तयन् बोधयेदिति नासीत् । शिष्यस्यापि अध्ययननिष्ठामात्रं पर्याप्तं नासीत् । अध्ययननिष्ठया सह आचार्यस्य प्रियमपि कर्तव्यम् भवति स्म इति महाभारतं प्रमाणयति–

> आचार्यस्य प्रियं कुर्यात् प्राणैरपि धनैरपि ।
> कर्मणा मनसा वाचा द्वितीयः पाद उच्यते ॥ महाभा./उद्योग./४४/१२

किन्तु सम्प्रति तथा नास्ति परिस्थितिः । इच्छुकः अनिच्छुकः श्रद्धावान् अश्रद्धावान् इत्यादिभेदैः विनैव शिक्षायाः प्राप्तेः अधिकारः सर्वेषाम् सम्प्रति लोकतन्त्रात्मके देशेऽस्माकं वर्तते । किञ्च उत्पन्नैः सर्वैरपि बालैः नियमेन प्राथमिकी शिक्षा प्राप्तव्या इति सर्वकारः शास्ति । अतः कक्ष्यायां अत्यधिकसंख्याकानां सर्वविधच्छात्राणां अवगमनं यथा स्यात् तथा बोधयितुं उपायाः चिन्तनीयाः, चिन्तिताश्च अनुष्ठेयाः ।

**उद्देश्यानि**

- आधुनिके काले संस्कृतभाषाशिक्षणाय के उत्तमाः उपायाः इति अन्वेषणम् ।
- सूचनासम्प्रेषणप्रविधिः संस्कृतभाषाशिक्षणाय कथं सहकरोति इत्यस्य परिशीलनम् ।
- साम्प्रतिके काले सूचनासम्प्रेषणप्रविधेः प्रकाराणां उपयोगितायाः अवगमनम् ।

**शोधपद्धतिः**
अस्मिन् शोधे शोधस्य उद्देश्यानि साधयितुं साम्प्रतिकभाषाशिक्षणसाधनानां सर्वेक्षणं व्यधायि । आधुनिकग्रन्थानां अन्तर्जालाधारितानां संसूचनानां आकलनं च व्यधायि । तदनुसारं शोधपरिणामो निरणायि।
उद्देश्यानि मनसि निधाय शिक्षाक्षेत्रे अध्यापनविधिषु सहायकसामग्रिषु समुचितपरिवर्तनमानेतुं बहुविधचिन्तनं अनुसन्धानं आविष्कारश्च क्रियमाणो वर्तते । अपि च छात्रकेन्द्रितशिक्षाव्यवस्था लोकतन्त्रानुसारिणी इत्यतः उपाध्यायाः अनुशासनसंरक्षणार्थं निन्दनगर्हणभर्त्सनताडनादिकं विहाय उपायेन छात्रान्

लक्ष्यसाधनैकतत्परान् कृत्वा तदुत्साहं वर्धयन्तः अध्यापयेयुः । छात्राः न अवगच्छन्ति चेत् तस्य कारणम् उपाध्याय एव स्वयं भवति । उपाध्यायः सक्रियो भूत्वा छात्रांश्च सक्रियान् कुर्वन् अध्यापयेत् ।

आचार्यस्यैव तज्जाड्यं यच्छिष्यो नावबुध्यते ।
गावो गोपालकेनैव कुतीर्थमवतारिताः ॥
अन्ययोगव्यवच्छेदः–द्वात्रिंशतिका / १५

इत्थं सर्वविधानां छात्राणां बोधनार्थं, बोधने साफल्यावाप्त्यर्थं च शिक्षकः नवीनचिन्तनं कुर्वन् आधुनिकोपकरणानि उपयुञ्जानः प्रभावविधीन् आश्रयेत ।
भाषाशिक्षणे दृश्यश्रव्यसाधनानां उपयोगः महते लाभाय भवति । मनुष्यः पञ्चभिर्ज्ञानेन्द्रियैः ज्ञानं प्राप्नोति । इन्द्रियाणि ज्ञानप्राप्तेः द्वाराणि भवन्ति । शब्दस्पर्शरूपरसगन्धाः श्रोत्रादीन्द्रियाणां विषयाः भवन्ति । यद्यपि श्रोत्रेण शब्दं निशम्य सर्वाधिकज्ञानराशिः सम्पाद्यते तथापि शिक्षायाः आरम्भिकस्तरे तावत् अन्येन्द्रियग्राह्यविषयाः तत्तदिन्द्रियेण एव गृह्यन्ते चेदेव बोधः सुदृढो भवति । यथा आम्रस्य स्वादं वा, केतकीगन्धं वा, अग्नेरौष्ण्यं वा, शकुन्तलायाः सौन्दर्यं वा शब्देन व्याख्यास्यामः चेत् यादृशो बोधो भवति तदपेक्षया प्रभावी बोधः, तत्तदिन्द्रियमाध्यमेन कारयामः चेत् भवति । अतः विद्यालये तद्विषये अवधानं दातव्यम् । किन्तु विद्यालये त्वगिन्द्रियग्राह्यविषयाः रसनेन्द्रियग्राह्यविषयाः घ्राणेन्द्रियग्राह्यविषयाः च बालकस्य शैक्षिकविकासदृष्ट्या अल्पीयांस इत्यतः तेषाम् आवश्यकता अपि अल्पा एव । किन्तु चक्षुरिन्द्रियग्राह्यः श्रवणेन्द्रियग्राह्यश्च विषयः अत्यन्तं विफुलो वर्तते इत्यतः तदुपयोगिसाधनानां निर्माणम् प्रयोगश्च छात्राणाम् अत्यन्तम् उपयोगाय भवति । अत एव शिक्षाक्षेत्रे श्यामफलकादारभ्य विविधानां प्रक्षेपकयन्त्राणाम् आविष्कारः/आविष्कृतानाम् उपयोगः जायमानो वर्तते । एतादृशानां यन्त्राणां माध्यमेन बोध्यविषयस्य सुचारुप्रस्तुतिः छात्रस्य सुखावबोधाय समग्रावबोधाय दृढावबोधाय च भवतीति नास्ति संशीतिलेशः ।

सूचनासम्प्रेषणप्रविधिः ICT

सूचनासम्प्रेषणप्रविधिः शिक्षाक्षेत्रे आधुनिकयुगे अनुस्रियमाणः प्रविधिः । सूचना इत्युक्ते ज्ञेयांशः इत्यर्थः । अयं ज्ञेयांशः कथं ज्ञापनीयः इति बहोः कालादेव विचारः प्रवृत्त एव । कालिदासः मालविकाग्निमित्रे इत्थमुक्तवान् –

श्लिष्टा क्रिया कस्यचिदात्मसंस्था सङ्क्रान्तिरन्यस्य विशेषयुक्ता ।
यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव ॥ इति ।

इत्युक्ते शिक्षकस्य वैदुष्यमात्रं छात्रोपयोगाय न भवति । वैदुष्येन सह विषयसङ्क्रमणकौशलमपि यस्मिन् शिक्षके भवति स एव शिक्षकप्रवरः भवतीति कालिदासोक्तेः तात्पर्यं भवति । अतः छात्रावगतिं प्रभावयितुं सङ्क्रमणकौशलस्य बलवर्धनं करोति सूचनासम्प्रेषणप्रविधिः इति वक्तुं शक्नुमः । शिक्षकः स्वयं All rounder भवेदिति अपेक्षा तु भवति । किन्तु सर्वेऽपि शिक्षकाः तथा भवितुं नार्हन्ति । शिक्षकः उत्तमः गायकः, अभिनेता, व्याख्याता, ज्ञानी, सम्प्रेषकः, वक्ता, वाग्मी न भवति चेदपि ICT माध्यमेन आडियो–वीडियो इत्यादिकम् उपयुज्य छात्रस्य अपेक्षां पूरयितुं शिक्षकः प्रभवति । शिक्षकः गायकः नास्ति चेदपि उत्तमं गीतं ICT माध्यमेन श्रावयितुमर्हति । शिक्षकः उत्तमः अभिनेता नास्ति चेदपि पूर्वाभिनीतं वीडियो छात्रेभ्यः दर्शयितुमर्हति । बोध्यमानस्य विषयस्य समुचितप्रस्तुत्यर्थं सङ्गणकमाध्यमेन लिखितांशान् अपि प्रदर्शयितुमर्हति । तदर्थं Graphical Representation उपयोक्तुमर्हति । विविधानि चित्राणि रेखाचित्राणि मानचित्राणि, कोष्टकानि च सङ्गणके निर्माय दर्शयितुमर्हति । इत्थं क्रियते चेत् छात्राः अध्यापकोक्तविषयान् समग्ररूपेण ज्ञातुं प्रभवन्ति ।

इतोऽपि छात्राणां जिज्ञासा भवति चेत् तत्परिपूर्त्यर्थं सम्बद्धानां विविधजालपुटानां सङ्केतं शिक्षकात् सम्प्राप्य अन्तर्जालमाध्यमेन ई–अधिगमेन च छात्राः स्वज्ञानं विस्तारयितुमर्हन्ति । अतः सूचनासम्प्रेषणप्रविधिः आधुनिककाले शिक्षकस्य महते उपकाराय भवति ।
माध्यमिकस्तरे कर्नाटकस्य परिप्रेक्ष्ये तु सर्वकारीयविद्यालयेष्वेव सूचनासम्प्रेषणप्रविधेः उपयोगार्थं दशवर्षेभ्यः प्रागेव व्यवस्था कल्पिता असीत् । किन्तु सर्वकारपरिवर्तनकारणात् योजनायाः प्रयोजनं अद्यावधि केनापि सर्वकारीयविद्यालयीयच्छात्रेण न प्राप्तमस्ति । शिक्षाक्षेत्रस्य विकासेन समाजस्य उत्कर्षः भवतीति ज्ञात्वापि सर्वकारः तदपकर्षार्थं यतमानो वर्तते वेति भासते । असर्वकारीयविद्यालयेषु यशःप्राप्तिकामनया वा सूचनासम्प्रेषणप्रविधेः उपयोगार्थं अपेक्षितयन्त्राणां व्यवस्था कल्पिता वर्तते एव । महानगरेषु माध्यमिकविद्यालयेषु प्रतिकक्ष्यं प्रक्षेपकयन्त्रसङ्गणकयन्त्रादीनां व्यवस्था कल्पिता दृश्यते । लघुपत्तनेषु प्रतिस्पर्धायाः अभावात् Audio Visual Room इति नाम्ना वा Smart Class इति नाम्ना वा एकः प्रकोष्टः तदर्थं कल्पितो दृष्टिपथे आयाति । बहूनां महाविद्यालयानां प्रायः ईदृशी एव स्थितिरवलोक्यते । केषुचिदेव महाविद्यालयेषु प्रतिकक्षं वयं सूचनासम्प्रेषणप्रविधेः उपयोगानुकूलवातावरणं द्रष्टुं शक्नुमः ।
संस्कृतशिक्षाक्षेत्रे सम्प्रति अधिकाधिकाः शिक्षकाः एतस्य उपयोगं कुर्वाणाः सन्ति । महाविद्यालयीयस्तरे माध्यमिकविद्यालयीयस्तरे च बहवः एतस्य उपयोगं जानन्ति । किन्तु ICT आश्रित्य पाठ्यसामग्रीनिर्माणं समयसाध्यं कार्यम् इत्यतः एतस्य प्रविधेः नियतोपयोगः अतिविरलो वर्तते ।

**Massive Open Online Courses (MOOCs)**

सम्प्रति भारतसर्वकारस्य नवीनयोजनासु डेंपअम व्पमद व्दसपदम ब्वनतेमे (MOOCs) प्रामुख्यमावहति । बहुषु विश्वविद्यालयेषु बहवः विद्वांसः एतस्मिन् क्षेत्रे कार्यं कृतवन्तः । भारते तु SWAYAM इति नाम्ना अन्तर्जालाधारितपाठ्यक्रमनिर्माणाभिकरणेन विदुषां कृते अवसरं कल्पयति । परियोजनामाध्यमेनापि MOOCS निर्माणं कर्तुं शक्यते । संस्कृतभाषाशिक्षणार्थं शास्त्रशिक्षणार्थं वा कोऽपि विश्वविद्यालयीयः अध्यापकः पाठ्यक्रमं रचयितुमर्हति । पाट्यक्रमस्य रूपरेखा SWAYAM इत्यनया संस्थया यथा निर्धारिता तथा भवेत् । तदर्थम् वित्तीयसाहाय्यम् SWAYAM इत्याख्या संस्था एव प्रयच्छति । छात्रः अन्तर्जालमाध्यमेन एनं पाठ्यक्रमं पठितुं पञ्जीयनं कृत्वा परीक्षां च लिखित्वा अन्तर्जालमाध्यमेन एव प्रमाणपत्रमपि प्राप्तुं अर्हति । इत्थं अध्येतुं इच्छुकः छात्रः साम्प्रतं मरुभूमौ वा भवतु, हिमालयसानुषु वा वसतु, अन्तर्जालव्यवस्थावान् चेत् गृहे स्थित्वा एव MOOCs कारणतः अध्ययनाय प्रवेशं प्राप्य स्वाभिलषितान् विषयान् यदा कदापि अधीत्य यदा कदापि परीक्षाम सम्मुखीकृत्य प्रमाणपत्रं प्राप्तुम् अर्हति ।

**उपसंहारः**

इत्थं संस्कृतशिक्षणाय प्राचीनकाले अथवा समीपवर्तिकाले यथा प्रश्नोत्तरविधिः, व्याख्यानविधिः, प्रत्यक्षविधिः, अनुवादविधिः इत्यादीन् विधीन् उपाध्यायाः उपयुञ्जाना आसन् तदपेक्षया सूचनासम्प्रेषणप्रविधिः तान् सर्वान् विधीन् उपयुज्य एव अधिकच्छात्राणां कक्ष्यायां प्रभावात्मकबोधनाय उपयुक्तः इति ज्ञायते । सूचनासम्प्रषणप्रविधेः कारणतः MOOCs इत्यस्यापि विस्तारः जायमानो वर्तते इति पार्थक्येन वक्तव्यं नास्ति ।

**सन्दर्भः**


1. Mangal SK, Mangal Uma. Educational Technology, PHI Learning Private Limited, New Delhi, २०१२.
2. ओ.ए.शर्मा, शैक्षिक तकनीकी के मूलाधार, आर लाल बुक् डिपो, मेरठ (२०१२)
3. मिश्रः रमाकान्तः, शैक्षिकप्रविधिः, चौखम्बा सुरभारती प्रकाशन, वारणसी (२००६)

4. Srivatsava DS, Sarita Kumara. Significance of Information and communication Technology, Shree Publishers and Distributers, New Delhi, 2004.
5. Mohanasundaram K, Kumaran D. (Web Based Instruction) An innovative Teaching Strategy - University News, 2001, 19-25.